CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



# उत्कलिका

हरिदत्त शर्मा

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अभिनन्दनीयेभ्यः
सुहृद्वर्येभ्यः
कविवर्येभ्यः
डा॰ रमाकान्तशुक्ल-
महोदयेभ्यः
सादरम्

१ दिसम्बर, १९८०

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# UTKALIKĀ

( A Collection of Melodious Sanskrit Lyrics )

*by*

**Dr. Hari Dutt Sharma**
Department of Sanskrit
University of Allahabad
Allahabad

Anjaneya Prakashan
Allahabad

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Publisher :—
Anjaneya Prakashan
100, Allenganj
Allahabad-211002
India

Ist edition—1989
Price—Rs. 40.00 (Rupees Forty)

Printer :—
Shakuntal Mudranalay
34, Balrampur house
Allahabad-211002

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# उत्कलिका

( सुमधुर-संस्कृत-गीति-सङ्कलनम् )

रचयिता

डा० हरिदत्त शर्मा

संस्कृत विभाग

इलाहाबाद विश्वविद्यालय

इलाहाबाद

आञ्जनेय प्रकाशन

इलाहाबाद

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

प्रकाशक :—
आञ्जनेय प्रकाशन
१००, एलनगंज
इलाहाबाद—२११००२
भारत

●

प्रथम संस्करण—१६८८ ई०, १००० प्रतियाँ
मूल्य—रु० ४०.०० ( चालीस रुपये )

●

[ उत्तर प्रदेश संस्कृत अकादमी द्वारा प्रदत्त आर्थिक सहायता से प्रकाशित ]

●

मुद्रक—शाकुन्तल मुद्रणालय
३४, बलरामपुर हाउस
इलाहाबाद—२११००२

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# FOREWORD

Dr. Haridatta Sharma became known to me when I first met him at the Fifth World Sanskrit Conference held in Benares in 1981. After this first encounter we met again at various occasions, at the last three sessions of the All India Oriental Conference, held in Ahmedabad, Calcutta and Viśākhapattanam, and twice in Germany, in Bonn and Marburg. Since that time I am familiar with the creative aspect of Dr. Sharma's work in the field of Sanskrit because he kindly presented to me copies of his two previous publications *Gītakandalikā* and *Tripathagā*. Moreover I had the privilege to listen to the recitation of quite a few poems by the poet himself, both publicly and privately. This is indeed an almost inseparable feature from the mere process of writing which may greatly enhance the effect of the poems, granted the author is also a gifted reciter which is fortunately the case with Dr. Sharma It is only a few weeks ago that Dr. Sharma, kindly responding to my invitation, delivered a lecture at the Indological Institute of the University of Marburg. At this occasion he read several poems from his new collection *Utkalikā* and it was a revelation for the German students of Sanskrit to see that Sanskrit is not a dead language at all.

This new anthology, so aptly entitled *Utkalikā* (because in Sanskrit *Utkalikā* has more than just one meaning, all of them quite suitable to the content of the collection), consists of 33 independent and individually formed Sankrit poems. Thirty of them are Dr. Sharma's own compositions, to which he added three translations; of a Vraja folksong on the Holi

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



festival, of an Urdu and a German poem (Nos. 30-32). The majority of the poet's compositions are expressions of his own feelings. In *Rasasvadanam* "The Taste of Nectar" (No. 22) we see the description of the tender emotions which a young man experiences in the presence of his beloved. Similarly, in *Manomanthanam* "Agitation of the Mind" (No. 23) the excitement of the heart is depicted in short and swift lines of vigour. The poem *Īdṛśo bhaveyam* "Would I become like this" (No. 3) gives us a collection of moral maxims, expressed in the form of personal wishes, which describe the conduct of an ideal human being aiming for tranquility. As in the former anthology *Gītakandalikā* we also find descriptions of some of the bitter experiences made by the author. What we read, however, is not a personal complaint but their transformation into some general truth about the more gloomy sides of life. *Sphītaṃ viṣaṃ nipītam* "Plenty of poison has been drunk" (No. 7) is a series of well-chosen examples all of which illustrate how something which has just started blossoming or thriving is brutally suppressed by some external power. The same sentiment is felt in No. 14, *Saṃgharṣasātatyam* "Continuous struggle", which depicts the ceaseless fight against all forms of injustice.

A particular feature of Dr. Sharma's "personal poems" is the vivid description of new impressions gained during his journeys abroad. This is displayed in poems like *Uḍḍīyate vimānam* "The airplane rises into the sky" (No. 27), an almost realistic description of all the details of a flight in an airplane; *Yūropīyam* "First experience of Europe" (No. 15), in which the speed of modern life in Western countries, the intrusion of technology into all spheres of life, the social and moral emancipation of women, the affluence in the markets

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



etc. are colourfully depicted; *Pāśeātyakarair lālitā* "Fostered by the hands of Westerners" (No. 20), an appraisal of the contribution of Western scholars to Sanskrit studies, apparently composed under the impression of the Seventh World Sanskrit Conference held in Leiden in 1987. In this connection the two poems *Navaṃ yugam* "The New Age" (No. 28) and *Perisanagarīyam* "Description of the city of Paris" (No. 29) should al·o be mentioned.

Other notable topics dealt with in Dr. Sharma's poems are those which can broadly be labelled as "social criticism", cf. *Ulūkotthānam* "Rising of the owls" (No 4), *Yautakahatakam* "The menace of Dowry system" (No. 5), *Saṃvidhānakam* "Strange events" (No. 8), *Saṅghaṭanam* "National integration" (No. 12), *Abhinandanam* "Welcome" (No. 13), *Kiyad viṣam avaśiṣṭam* "How much poison has been left" (No. 26) The author's consciousness for the social problems of contemporary India, despite all his love for his own country (cf No. 17, *Āyāti smaraṇapatham* "It enters my memory"), is in noble contrast which compositions exhausting themselves in an unrealistic hyperbolic glorification of modern India like *sarva eva śūrā bhāratīyāḥ* which I once read in a modern contemporary play.

In addition to these two main topics we find a few poems on more traditional topics like the nature of woman (No. 1, *Raṅgabhaṅgimā*), the winter season (No. 2, *Śītāgītam*), the confluence of the rivers Ganges and Yamuna at Allahabad (No. 11, *Saṅgamaḥ*), a night spent abroad (No. 18, *Yāti rajanī*).

The rhetorical devices are simple, yet effective. We find some of the old techniques like alliteration (*anuprāsa*) and

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



repetition of syllables (*yamaka*), more prominent, however, is the use of rhyme throughout the collection. The metrical pattern seems to be free, however very often the lines can be scanned as some kind of *mātrāvṛttas*. The full effect of these rhetorical and metrical devices of these poems can be felt only when they are properly recited.

Taken as a whole, *Utkalikā* is a fine representation of modern Sanskrit poetry, written in a lucid style and dealing with a number of topics, which genuinely express the feelings of an Indian intellectual and his reaction to modernization taking place everywhere. I wish this book of Dr. Sharma all the attention it deserves.

**Prof. Dr. Michael Hahn**

*Director*
*Instituie of Indology*
*Philipps University*
*Marburg*
*West Germany.*

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# आमुखम्

काव्यं नाम मानवीयमनोभावानां रसात्मकमभिव्यञ्जनम्, गीतिकाव्यञ्च काव्यस्य रम्यतमं रूपम्। संस्कृतगीतिकाव्यं कोमलभावस्य, मधुरसङ्गीतस्य, मनोरमच्छन्दसश्च सुन्दरः सङ्गमः। गीतिरेव गहनभावानामुच्छ्वासः, तथा लयसन्तरणमयो भावोद्रेको गीतेरात्मा। आधुनिक-संस्कृत-गीतिकाव्ये गेयतागुणसमवेतानां, लयलालितानां, रागराजितानां, सरलसरसानां, लोकगीतानुवर्तिनीनां, समसामयिकविषयवासितानां गीतीनां बाहुल्यं वर्तते। तर्हि 'गीयत इति गीतं काव्यम्' इत्यभिनव-कथनं, 'न गानं ध्रुवकं विना' इति रागार्णवमतञ्चानुसृत्य चतुश्चरणात्मकच्छन्दोरचनायाः पारम्परिकप्रवृत्तिं परित्यज्य पौनःपुन्येन ध्रुवकप्रयोगस्य पद्धतिरङ्गीकृताऽत्र नवगीतरचनाविधौ मयेति छान्दसी साङ्गीतिकवीणा विराजतेऽत्र, न तु शास्त्रीया सङ्गीतलहरी। भावरागयोः सम्मेलनेन यत्किञ्चिन् नवीनरचनारूपमत्र प्रस्फुटति तदेव देवगवीगीतम्।

उत्कलिकेयं गीतकन्दलिकाया अनन्तरं मदीयाया गीतिकाव्यमालिकाया द्वितीयं कुसुमम्। नवकन्दलरूपेण प्रत्यग्राङ्कुररूपेण वा मदीये बालहृदये निक्षिप्तं यत् काव्यबीजं पूर्वं प्रस्फुटितं, साम्प्रतं लघुलतिकारूपमादधाने तस्मिन्नेव नवा कलिका उद्गता, कन्दलिका कोरककलिता सती उत्कलिका जाता। कमनीयकैशोर्यमारुरुक्षमाणायाः कवितायाः अन्तर्मनसि काचिदुत्कलिका जायत एव, पुनर्बहुविधानां भावानामुत्कलिकाः प्रवहन्त्येव तस्मिन् सरसे मानससरसि। कवेरन्तर्जगति उदीयमानानां, मथ्यमानानां, सञ्चरतां, साधारणीकृतानां, विविधानां भावजालानां सन्दर्शनेनात्र समग्रं लोकदर्शनमेव संजायते। गीतिषु विद्यमानं जीवनं समग्रस्यैव समाजस्य जीवनप्रतिबिम्बनम्।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



अस्या रचनायाः प्रणयनस्य कालान्तर एव मम पूर्वजर्मनीदेशस्य चातुर्मासिकी सांस्कृतिकी यात्रा संजाता, पुनः पश्चिमजर्मनीदेशस्य, नीदरलैण्डस्य च स्वल्पकालिको यात्रावसरो लब्धः, पुनश्चेदानीं फ्रांस-राजधान्याः पेरिसपुर्या अपि द्वैमासिकी यात्रा सम्प्राप्ता। इत्थमेतद् योरोपीययात्रावसरे प्रवासे ये केचिदनुभवाः जातास्तेऽपि गीतरूप-मादधानाः काव्येऽस्मिन् संन्निवेशिताः। अतस्त्रयस्त्रिंशत्संख्यामितेषु गीतेषु नैकानि वैदेशिकवर्णनपराणि वर्तन्ते।

काव्यस्यास्य लोकार्पणं कुर्वन्नहं पश्चिमजर्मनीदेशे मारबुर्गनगरे स्थितस्य फिलिप्सविश्वविद्यालयस्य भारतीयाध्ययनशालाया निदेशक-पदमलङ्कुर्वाणानां, संस्कृतविद्याध्ययन-विहितगुरुतराध्यवसायानां, नैक-संस्कृतग्रन्थलेखन-सम्पादन-प्रकाशन-प्राप्तप्रभूतकीर्तीनां, ऋषितुल्यानां प्रोफेसर-डाक्टर-माइकेल-हान-महोदयानां परमनुगृहीतोऽस्मि यैः मत्प्रार्थ-नया काव्यस्यास्य भूमिका लिखिता। तान् प्रति कृतज्ञताज्ञापनाय शब्दान्वेषणमेव दुष्करम्। अस्या रचनायाः प्रकाशनावसरेऽहं लखनऊ-स्थिताम् उत्तरप्रदेशसंस्कृताकादमीं बहुभिर्धन्यवादैः सत्कृतां कर्तु-मिच्छामि, यया अस्य काव्यस्य प्रकाशनाय आर्थिकसाहाय्यंरूपेणानु-दानं प्रदत्तम्, अन्यथा एतादृशानां काव्यानां मुद्रणं प्रकाशनञ्च सम्प्रति वित्तभारवशात् दुष्करमेव जातम्। शाकुन्तलमुद्रणालयस्य प्रबन्धकाः श्री उपेन्द्रत्रिपाठिमहोदया अपि मे धन्यवादभाजनतां वहन्ति, यैर्ग्रन्थ-स्यास्य मुद्रणे भूयान् भारः ऊढः, समधिका सावधानता च साधिता। बहूनां गुरूणां, मनीषिणां, मित्राणाञ्च ऋणमहं धारयामि, अतः सर्वेभ्यः सविनयं नवगीतोत्कलिकाञ्जलिमेवोपहरामीति शम्।

विनयावनतः—

हरिदत्त शर्मा

३१ दिसम्बर, १९८९

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# अनुक्रमणिका


| क्रमसंख्या | गीतशीर्षकम् | | पृष्ठाङ्कः |
|---|---|---|---|
| १. | रङ्गभङ्गिमा | .... | १ |
| २. | शीतगीतम् | .... | ५ |
| ३. | ईदृशो भवेयम् | .... | ९ |
| ४. | उलूकोत्थानम् | .... | ११ |
| ५. | यौतकहतकम् | .... | १५ |
| ६. | अभियानम् | .... | १८ |
| ७. | स्फीतं विषं निपीतम् | .... | २२ |
| ८. | संविधानकम् | .... | २५ |
| ९. | क्षणोपायनम् | .... | २८ |
| १०. | जिजीविषा | .... | ३१ |
| ११. | सङ्गमः | .... | ३४ |
| १२. | सङ्घटनम् | .... | ३६ |
| १३. | अभिनन्दनम् | .... | ४० |
| १४. | सङ्घर्ष-सातत्यम् | .... | ४३ |
| १५. | अयि मे विमानराज | .... | ४६ |
| १६. | योरोपीयम् | .... | ४९ |
| १७. | आयाति स्मरणपथम् | .... | ५२ |
| १८. | याति रजनी | .... | ५६ |
| १९. | पातन-यन्त्रणा | .... | ५९ |
| २०. | पाश्चात्यकरैर्लालिता | .... | ६१ |
| २१. | नवाभ्यागमनम् | .... | ६४ |


Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



| क्रमसंख्या | गीतशीर्षकम् | | पृष्ठाङ्कः |
|---|---|---|---|
| २२. | रसस्वदनम् | .... | ६६ |
| २३. | मनोमन्थनम् | .... | ६८ |
| २४. | क्रोडन-पीडनम् | .... | ७० |
| २५. | केयं कदर्थना | .... | ७२ |
| २६. | कियद् विषमवशिष्टम् | .... | ७४ |
| २७. | उड्डीयते विमानम् | .... | ७६ |
| २८. | नवं युगम् | .... | ८० |
| २९. | पेरिसनगरीयम् | .... | ८४ |
| ३०. | होलिका | .... | ८८ |
| ३१. | एका काङ्क्षा | .... | ८९ |
| ३२. | शयनं तव बाहुपाशे | .... | ९१ |
| ३३. | जाता सोत्कलिका | .... | ९३ |

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# रङ्गभङ्गिमा

अयि चपले ! मा भ्रम मम देशे
विगतः प्रावृट्कालः ।
रे छलने ! न हि नट मे भवने
तेऽभिनयस्तु करालः ॥

मुग्धमनोभिस्तृषितलोचनै-
रवलोकिता सुलीला ।
विविधविलासाः सुस्मितहासा-
स्तव जलदाली नीला ॥

दृष्ट्वा ललितं ललितमनृत्यम्
चकितोऽहञ्च सतालः ।

विगतः……

किलकिञ्चितमञ्चितं त्वयैव
बहुविध-विभ्रमभङ्गः ।
अयि दामिनि ! ते हावाः के के
हेला लीला रङ्गः ॥

सकलमिदं संरचितं नाट्यं
संरम्भश्च विशालः ।

विगतः……

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



आरोपणमनुमानमिदं वा
व्यञ्जनमथवा भोगः ।
किमिदं ते छलजालमद्भुतं
कोऽयं विषप्रयोगः ॥

हृदयहरिणहारिणि मृगतृष्णे !
तव पाशो विकरालः ।
विगतः……

छलनं मनसि वचसि माधुर्यं
चाङ्गे स्पन्दनलासाः ।
आहार्यं मोहकं विचित्रा
अभिनयकला-विलासाः ॥

नैकभूमिका धारयसि त्वं
यथा नटी नटबालः ।
विगतः……

न हि सुस्थिरतां याति कदाचित्
सन्धिस्ते स्नेहस्य ।
न च यथार्थप्रकृतिर्नोऽवस्था
ज्ञेयान्तर्गेहस्य ॥

मानससरसि न नीरं क्षीरं
तव विविनक्ति मरालः ।
विगतः……

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



स्वगतं किमपि, प्रकाशं चान्यत्
तेऽन्तर्बाह्यविशेषः ।
नेपथ्ये सङ्घटते किञ्चिद्
रङ्गे भङ्गिप्रवेशः ॥

अक्ष्णोरग्रे स्थिता जवनिका
पट एषोऽस्ति विशालः ।
विगतः·····

कुसुमे कुसुमे भ्रमणमनुदिनं
बहुल - विविधरसपानम् ।
तव हृदयस्य कदापि न जातं
ह्येकस्मिन्नवधानम् ॥

अयि तित्तिलिके ! सरति शनैरिह
मधुरोऽयं मधुकालः ।
विगतः·····

अमृतकलशहरणाय धारयसि
कपटकामिनीवेशम् ।
मुनिजन - तपोविघ्नकरणाय
भ्रमसि वनाद् वनदेशम् ॥

अयि नागरिके ! का वृत्तिस्ते
किं कुक्षौ करवालः ?
विगतः·····

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



बन्धविधायिनि किमिति वागुरे !
मां बध्नासि स्वतन्त्रम् ।
मम हृदयं जानाति न किञ्चित्
कपटं भ्रमं च मन्त्रम् ॥

व्यालो यथाचरति विद्युत् ! ते
घनकचपाशः कालः ।
विगतः……

नयनजलैर्हासैः सविलासैः
तोषण-रोषणवचनैः ।
भावतरङ्गैर्नाटयसि त्वं
कटु-मृदुभाषारचनैः ॥

तव शैलूषि ! न पुनर्दृश्यतां
कला-कलाप-करालः ।
विगतः……

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# शीतगीतम्

शारदशोभा क्व नु संयाता
आतपतपनं वीतम् !
अयि प्रवर्तते शीतम्
भुवि प्रवर्तते शीतम् !!

हिमकर-करैरधिकशीतैर्निशि
हिमवर्षणमारब्धम् ।
दिनकर-करैस्तापबलरहितै-
र्दिवा दैन्यमुपलब्धम् ।।

केनौष्ण्यं जगतामतिविततं
सपदि सकलमपनीतम् ।
अयि......

कम्पनकारी हिमकणधारी
प्राप्तः शैशिरकालः ।
कृतसीत्कारं वारं वारं
कुरुते वृद्धो बालः ।।

तुहिनाचल-हिमवृन्दं प्रसरति
कौ द्रवतामिव नीतम् ।
भुवि......

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



दीर्घतरा अतिशीता जाताः
शिशिर-यामिनी-यामाः ।
ज्वलितानल-निर्यातैर्धूमै-
दिग्भागाः सुश्यामाः ॥

दिनकरतेजः क्व नु पलायितं
शीताद् भीतं भीतम् ।
अयि……

अनिलः सलिलं नैव रोचते
ह्यनल एव रे शरणम् ।
तूलभरित-वसनानि कम्बला
ऊर्णरचितमावरणम् ॥

उष्णं पेयं परमनुकूलं
शीतं त्वतिविपरीतम् ।
भुवि……

वसनविहीना निर्धनदीनाः
सीत्कारं कुर्वाणाः
निशि तिष्ठन्ति क्वचिन्नग्ना हा
हिमघातं सहमानाः ॥

रात्रिर्याति न कालमयीयं
दिनं कथञ्चिद् वीनम् ।
अयि……

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



सरसर वहति समीरः शीतो
जनशून्याः पन्थानः ।
ग्राम्यजनो मण्डलितः परितो
वह्निसुखं लभमानः ॥

वातविघातैः सकलजगदिदं
स्वगृहपिटकमिव नीतम् ।
भुवि......

लोध्रं विलसति कुन्दं क्रीडति
कमलवनं प्रविलीनम् ।
अङ्कुरिताश्चणका गोधूमाः
क्षेत्रमिक्षुभिः पीनम् ॥

दर्शनपथमायाति धरायां
सर्षपपुष्पं पीतम् ।
अयि......

कुर्वन्त्यो रसचोषणमिक्षो-
श्चणकचर्वणे लग्नाः ।
मुग्धा ग्रामयुवतयः कृषिभुवि
मधुरालापनिमग्नाः ॥

शीतलपवनैः सह ताभिर्निज-
गीतं विपिने गीतम् ।
भुवि.......

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



पर्वतीयभूमिषु विस्तीर्णं
धवलतुषारावरणम् ।
हस्तैर्हिमकन्दुकक्रीडनं
पादैस्तदुपरि सरणम् ॥

युवयुगलैर्लभ्यते सलीलं
विहरणसौख्यं स्फीतम् ।
अयि······

शीतानिलसंवलिता रजनी
परिपातिता हिमानी ।
शिशिरे शोभां वहति च धरणी
विस्तीर्णाऽरण्यानी ॥

इन्दुबिम्बमिह विकिरति शैत्यं
षोडश-कला-परीतम् ।
भुवि······
अयि······

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# ईदृशो भवेयम्

इच्छामि जीवनं तत्
यस्मिन् सुखं वसेयम् ।
वाञ्छामि सुस्थलं तत्
स्वैरं यतः श्वसेयम् ॥

याच्ञा भवेन्न वचने
चाटूनि नैव लपने
न प्रसृतकरः कदाचिन् नीचान् प्रति व्रजेयम् ।
इच्छामि……

नयने न दीनभावः
न च हीनताप्रभावः
न मदान्धकुप्रसूणां द्वारे शिरो नमेयम् ।
इच्छामि……

हृदये भवेन्न भीतिः
पणके न चातिप्रीतिः
उदरस्य पूरणार्थं मानं न च त्यजेयम् ।
इच्छामि……

ईर्ष्यानिले न दाहः
हृदि मे सुधाप्रवाहः
निष्कारणं विरोधे निजवैरिणं शमेयम् ।
इच्छामि……

अधमैस्तु स्यान्न सङ्गः
मानो भवेन्न भङ्गः
अमृतस्य मार्गणेऽहं बहुगरलमपि पिबेयम् ।
इच्छामि……

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



शीतातपादिघाताः
स्युर्वा हिमप्रपाताः
जनवचन-वज्रघातादात्मानमुद्धरेयम् ।
इच्छामि·······

विशदीभवेत् स्वहृदयम्
मालिन्यमेतु विलयम्
शाठ्यं छलं प्रपञ्चं न मनागपि स्पृशेयम् ।
इच्छामि·· ···

विपदां भवन्तु वाताः
बहुदुःखशोकघाताः
कुसुमास्तरण इवाहं कण्टकपथे चलेयम् ।
इच्छामि······

आत्मनि न दुर्बलत्वम्
अधरीभवेन्न सत्त्वम्
परवशतया कदाचिन् नानीप्सितं विधेयम् ।
इच्छामि······

तरिकः स्वमानपोषः
मौर्दण्ड आत्मतोषः
आरुह्य शान्तितरणिं जगदर्णवं तरेयम् ।
इच्छामि······
वाञ्छामि······

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# उलूकोत्थानम्

प्रतिशाखं संस्थिता उलूकाः
लोका अवलोकयत !
परमवाग्मिनो जाता मूकाः
लोका अवलोकयत !!

येषां नार्हत्वं न च शिक्षा
आसन्दिकासु दृढमासीनाः ।
इतस्ततो भ्रमयुता भ्रमन्ति हि
विबुधजनाः पदरहिता दीनाः ।।

'कुरसी'रससम्मोहं
लोक अवलोकयत
प्रति०......

उप्तं त्यागतपस्याभूमौ
व्रतपरबहुजनरक्तैः सिक्तम् ।
राष्ट्रतरोः फलभक्षणनिरतैः
मर्कटकैरुद्यानं रिक्तम् ।।

को वपति च को भुङ्क्ते
लोका अवलोकयत
प्रति०......

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



अज्ञजनैः सद्विद्यारहितैः
वाग्देवी विपणे विक्रीता ।
धनपतयो विदुषां प्रशासकाः
गुरुपदवी पादाधो नीता ॥

गुणगरिमा लघुभूतः
लोका अवलोकयत

प्रति०......

कृष्णवर्णसमतामधिगम्य
काकैर्हृतं कोकिलाचरणम् ।
मृतशार्दूलचर्म परिधाय
चतुरशृगालैर्धृतमावरणम् ॥

अभिनयकला विचित्रा
लोका अवलोकयत

प्रति०......

चिरबुभुक्षितैर्वृकैरकस्मात्
स्वर्णमयी रोटिकाऽऽसादिता ।
ये विविधासितकर्मविलग्नाः
तदङ्केषु लक्ष्मीर्विराजिता ॥

धिक् कष्टं वैषम्यम्
लोका अवलोकयत

प्रति०......

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



धन-यौवन-नवनीत-बलैर्वा
निम्ना उन्नतपदमारूढाः ।
उत्कोचैरसदाचरणैर्ननु
सिंहासनमधिष्ठिता मूढाः ॥

अन्ध - बधिरखेलेयं
लोका अवलोकयत

प्रति०......

परधनमसदसियोगैर्हृत्वा
धनपतयो जाता लुण्टाकाः ।
सुखसौभाग्यमतीव भुञ्जते
भुवि लुठन्ति सज्जना वराकाः ॥

किमयं मानवधर्मः ?
लोका अवलोकयत

प्रति०......

लाभपदं लब्धं सुस्वल्पैः
परप्रतारणैश्छलबलजालैः ।
दुग्धं दधि सङ्कलितं गोभ्यः
परिपीतं तच्चतुरबिडालैः ॥

न हि किञ्चिद् ह्यवशिष्टम्
लोका अवलोकयत

प्रति०......

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



कुटिलानां सर्वत्र पूजनं
सरलानां नहि किञ्चित् स्थानम् ।
अमृतं हृतं बलेन राक्षसैः
देवेभ्यो विषमं विषपानम् ॥

का विषमा गतिरेषा ?
लोका अवलोकयत

प्रति०........

अन्धा उच्चासनमारुढाः
नयनवतां पथदर्शनलग्नाः ।
गर्तमेव गमिताः सकलास्ते
ये तेषामनुगमननिमग्नाः ॥

हाऽऽवस्था विपरीता !
लोका अवलोकयत ।

प्रतिशाखं०........
लोका अव०.......

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# यौतकहतकम्

नवयुगे नवमानवा रे ! का दशेयं सुविपरीता ?
पतति दहनेऽद्यापि सीता
ज्वलति दहनेऽद्यापि सीता

श्रुतं कन्याजन्म पितृभिर्मन्यते न हि हर्षवेला ।
नोत्सवो नृत्यं न वाद्यं प्राङ्गणे हेला, न खेला ।।

सुता जाता वा समस्या घोरचिन्ता वा प्रणीता
पतति दहने०......

बालिका क्रीडनैः क्रीडति यदा वयसः प्रथमकाले ।
सततपणसञ्चयपरौ पितरौ जराजीर्णाविकाले ।।

मानमप्यपहाय जाता जना नतशिरसो विनीताः
ज्वलति दहने०......

आपतति तारुण्यकालो नवकुसुममृदुहृदयहारो ।
सा बलाद् दशमुखपिशाचैः प्रह्रियते ह्रियते कुमारी ।।

रक्षिता नरराक्षसेभ्यो याति कथमपि भीतभीता
पतति दहने०......

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



निजगृहान्निस्सरति जनको ह्यापणं वरपण्यकारी ।
मेऽन्तिकेऽस्ति सुशिक्षिता बहुसुन्दरी सुभगा कुमारी ।

जनसमाजे मूल्यहीना कन्यका गुणगुणपरीता
ज्वलति दहने०······

देहि लक्षं दशसहस्रं धनं यदि कन्या प्रदेया ।
दूरदर्शन-यान-शीतक-सकलवस्तुविधा उपेयाः ।।

किं धनैः क्रीतो युवाऽसौ बालिका वा वरैः क्रीता ?
पतति दहने०······

लोभपाशैर्ग्रस्यमाना धनमदैरन्धायमानाः ।
हिंस्रपशवस्त्वेव जाता नवजनाः सभ्यायमानाः ।।

भवति सत्पथदर्शिका तेषां न नीतिर्नापि गीता
ज्वलति दहने०······

कथं कथमपि निगडिता सा परिणयस्य पवित्रपाशे ।
क्वापि कापि प्रताडिता परिपीडिता श्वश्रूसकाशे ।।

पितृसमैः श्वसुरैर्हता सा कापि रोदिति बहिर्नीता
पतति दहने०······

विषमदारुणयातनाभिर्मर्दिता बहुदुःखदीना ।
नाशयत्यात्मानमेका वह्निना सुसहायहीना ।।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



न चेन् म्रियते मार्यते हा वधूरचिरं सुपरिणीता
ज्वलति दहने०……

मर्दिता लतिका मतङ्गैर्हता धेनुर्दुष्टवधकैः ।
अद्य मानवता हता हा ! क्रूरकर्मपरीतहतकैः ॥

नवचमत्कृति-प्रगति-चक्रे चूर्णिता नारी विनीता
पतति दहने०……

वर्धते धनचयस्पर्धा चार्थमनुधावति समाजः ।
भिक्षते स सुसभ्यनव्यो याचते स हि राजराजः ॥

काधुनिकता चोन्नतिः का धिगिति विशशतीह वीता ?
ज्वलति दहने०……
पतति दहने०……



Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# अभियानम्

क्व नु नवं संसारपारं
भवति भव्यदलाभियानम् !
प्लवत उदधौ जलधियानम् !!
चलति सलिले सलिलयानम् !!

दश दिशः प्रसृताः सुदूरं
दर्शने नायाति वेला ।
गहनताऽगाधा तलेऽधः
अन्तरा साहसिकमेला ।।

उपरि शून्ये विततमेतद्
विमल-नीलाम्बर - वितानम् ।
प्लवति.......

नद-नदी - तरु-कुसुम-लतिका-
गिरि-मरुस्थल-जलधि-जालम् ।
भूर्नभो द्वीपानि देशाः
शशि-सवितृ- मण्डलविशालम् ।।

जगति कति विस्मयपदार्थाः
सपदि शक्यं नानुमानम् ।
प्लवति........

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



शीतमुष्णं षड्ऋतुनृत्यं
प्रकृतिलीला नवनवीना ।
अतल - वितल - रसातलादिषु
विधिजगद्रचना निलीना ॥

विविध - चित्र - रहस्यकानां
किन्नु सरलं ज्ञानमानम् ।
प्लवति.... ...

किमस्याद्यं किमवसानं
किं पुराणं किमु नवीनम् ?
एककारणनिर्मितायाः
फलं क्व नु सृष्टेर्विलीनम् ॥

शोधने सततं तु निरतं
नवं वैज्ञानिकविधानम् ।
प्लवति........

किं कुतो वायुर्जलं भूः
नैकप्रश्नाङ्कितं जननम् ।
स्फुरति विद्युद् विलसति द्यौः
कुतः कथमाभा-प्रचलनम् ॥

कीदृशश्चन्द्रोऽयमधुना
कविकृतेरुपमा - निधानम् ।
प्लवति........

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



इन्द्रधनुराकाशगङ्गा
दश दिशो भूमध्यरेखा ।
हिमगिरिर्ध्रुवदक्षिणश्च
घनघटासु सुधांशुलेखा ।।

ध्रुवं प्रति वैज्ञानिकानां
भवति प्रतिवर्षं प्रयाणम् ।
प्लवति.......

दिन - निशा - भू - गगनबिम्बं
जलापूरं मरुविशालम् ।
तमो ज्योतिर्हिमं रेणुः
शुष्कता घनवृष्टिजालम् ।।

विविध - विषमैर्द्वन्द्वजालैः
भृतमिदं विस्मयस्थानम् ।
प्लवति.......

अनल-पिण्डमभूत् पुरेदं
चलजलस्याप्लावनं वा ।
एकतो द्वौ, द्वितो बहवः
सृष्टिगणनाचिन्तनं वा ।।

प्राणिनां जन्मान्तवृत्तं
जयति दलमनुसन्दधानम् ।
प्लवति.......

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



उपलपातो यत्र खेला
शिरो गिरयो वनं वसनम् ।
शक्तिरेषा का हि यस्या
घनाः केशा ग्रहा नयनम् ।।

हिमो ह्रासः स्मितं विद्युत्
कोपनं वात्यावितानम् ।
प्लवति.......

विश्वजलधेर्मन्थनं चेत्
स्थितमसंख्यं रत्नजालम् ।
अमृतकुम्भः स्रवतु सततं
सुखरसं श्रेयांसि चालम् ।।

प्राक्प्रलयकालान्न पश्यतु
संसृतिर्निजमरणभानम् ।
प्लवति.......
चलति.......

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# स्फीतं विषं निपीतम्

स्फीतं विषं निपीतम्
कथमिह कल्यं वीतम्

प्रत्यूषे स्फुटिता नवकलिका ।
पवनकरैर्लालिता सरलिका ।।

उष्णोदकैः सेचनं विहितं
केन कृतं विपरीतम्
स्फीतं.........

इह किसलयमय-लताविकासः ।
केलिनर्तनं हासविलासः ॥

मखमिषेण प्रज्वलितं ज्वलनं
सकलं धूमपरीतम्
स्फीतं........

बाल्यं हसति लसति तरुणत्वम् ।
सपदि सुविदितं जीवनतत्त्वम् ।।

कर्णे पतितं पूर्वमकाले
क्रूरकाल—सङ्गीतम्
स्फीतं........

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



वाति वने सुखशीतलवाते ।
मृगपोतो जागर्ति प्रभाते ॥

बाणैर्व्यागुरिका हतवन्तः
मृदुवयसं तं भीतम्
स्फीतं........

बालसुलभखेलास्वनुरक्तः ।
सरलशिशुर्बहुवैधैर्युक्तः ॥

दष्टो दुष्टैर्मुहुर्द्विजिह्वै-
र्मिष्टमानवे नीतम्
स्फीतं........

असितनिशासु तमोविस्तारः ।
मेघैश्चन्द्रकिरण - संहारः ॥

सुखसाधनं चोरितं चौरैः
सर्वस्वं ह्यपनीतम्
स्फीतं........

द्वारि द्वारि मत्तवद् भ्रान्तः ।
नैराश्यावमाननाक्रान्तः ॥

पिहितं गेहकपाटं बहुभि-
र्जनैर्निजसुखं क्रीतम्
स्फीतं........

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



दुःसहमिह किं किं न हि सोढम् ।
शिरसि दुर्वहं किं न हि वोढम् ॥

पेषण एव यन्त्रणाचक्रे
मम जीवितं व्यतीतम्
स्फीतं........

नैकपुलाकैर्भरितं स्थालम् ।
श्रमजलार्जितं मृदुफलजालम् ॥

क्षुधिताग्रतो हृतं प्रसभं हा
धनपतिभिः सुगृहीतम्
स्फीतं........

कोकिलभागं भुङ्क्ते काकः ।
पश्यति लोको मूकवराकः ॥

कथयति परगतिरोधि-धावकं
जनं जयेन परीतम्
स्फीतं........
कथमिह........

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



# संविधानकम्

संविधानकं संविधानकम् ।
विलोकितं मयेह नवं संविधानकम् ॥

न रङ्गभूस्तथापि कलाकोविदा जनाः ।
प्रदर्शयन्ति चित्रमभिनयं हि सज्जनाः ॥

अहर्निशं प्रदर्श्यते तदेव नाटकम्
विलोकितं.......

आङ्गिकं न वाचिकं न सात्त्विकं समम् ।
अनेकरूपधारिभिश्छलं बलं परम् ॥

केन कोऽद्य घातितोऽत्र किं प्रमाणकम्
विलोकितं.......

बहिः सितं समुज्ज्वलं स्वरूपदर्शनम् ।
पटान्तरे तु सर्वकालकर्म-गूहनम् ॥

प्रकाशमत्र नैव केवलं जनान्तिकम्
विलोकितं.......

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



पणस्य वन्दनं प्रभोः पणस्य पूजनम् ।
पणैस्तु पण्यतां गतं जनस्य जीवनम् ।।

सुसङ्कटेऽस्ति मानवास्मिता-विमानकम्
विलोकितं.......

न्यायकारिणः शतं न्यायालयाः शतम् ।
नयस्य नात्र जायते तु दर्शनं परम् ।।

स्वलोचनेषु धारितं सुसम्प्रवारकन्
विलोकितं.......

कदाचिदेकहंसवरो दैवशापितः ।
तिरस्कृतो यदा स बकगणेषु प्रापितः ।।

जने जने प्रवर्तते न्विदं कथानकम्
विलोकितं.......

अतीत्य हस्तिवाजिनो बलात् स्थिताः खराः ।
मदेन घोषयन्ति प्राणिनां वयं वराः ।।

न मन्वते नु कश्चिदात्मना समानकम्
विलोकितं.......

अयं निजो वरेण्य असावहंसत्तमः ।
शिरःसु नः सदैव समारोहणे क्षमः ।।

सदोच्चपदस्थापने तदेव मानकम्
विलोकितं.......

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



ध्वजेषु धर्मधारका, जनेषु वञ्चकाः ।
प्रभूभवन्ति मायिनश्छलप्रपञ्चकाः ॥

जना विमोहिता विधाय मद्यपानकम्
विलोकितं........

अहो विचित्रता विरुद्धता विडम्बना ।
मनुष्यवंशजैर्हि मानवावमानना ॥

मतिष्वहो ततं किमद्भुतं वितानकम्
विलोकितं........
संविधानकं........

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# तृणोपायनम्

प्रकृतिर्हसति वहति सुखसारं
चलत क्षणं क्षणं लुण्टामः ।
छल-बलभरितमिदं भवजालं
सानन्दं विहाय विहरामः ।।

अयि कादम्बिनि ! संपातय मयि
इयदधिकं रसभारम् ।
अमृतेऽन्तर्बहिरङ्गं मज्जतु
यातु परं संसारम् ।।

कटुकं यातु विस्मृतिं सकलं
वै सुमधुररसेन जीवामः
प्रकृति........

अयि दामिनि ! रोचतेऽधिकं ते
दिशि दिशि नवसंस्फुरणम् ।
उड्डयने लीना बकमाला
रम्यं गगनाभरणम् ।।

क्व नु सुन्दरं शिवं संयातं
वयमपि परितो गवेषयामः
छल........

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



जगति सदोषा सन्ततमेषा
स्वार्थमयी संप्रीतिः ।
न हि विश्वासः कस्मिन्नपि रे
स्वेभ्य एव बहुभीतिः ॥

खेचरवृन्दं गगने यातं
वयमपि तेन सहैव चलामः
प्रकृति........

सुसहं वात्याचक्रं, शीतं
तपनमपीह सुसह्यम् ।
मनुजकृतं वञ्चन - प्रताडनं
देहि कदापि न मह्यम् ॥

अतिदुर्वहो दुर्वचनघातः
पवि-हिमघातं शिरसि वहामः
छल.......

सागर बन्धो ! तेऽन्तर्हृदयं
बहुपृथुलं गम्भीरम् ।
उज्ज्वलभावतरङ्गान् सिन्धो !
नयसि सदा निजतीरम् ॥

कटुकं लघुकं मनुज ! मनस्ते
तस्मादमृतं कथं पिबामः
प्रकृति.......

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



अनुदिनमात्महननमिह दुःखं
शोककरः संत्रासः।
हरति मनोमालिन्यं विषमं
कुसुममयो मधुमासः॥

दीप्तं भवेन्मनसि सज्ज्योतिः
अन्धे तमसि तु नैव पतामः

छल……
प्रकृति……

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# जिजीविषा

जीवामि वा म्रियेऽहं
प्रतिदिनमिदं न जाने।
मज्जामि सागरेऽहं
प्रवहणमिदं न जाने॥

अन्तर्निगूढकीटैः
खादितमिदं गृहं मे
हरिता हि नीरसा वा
वनतरुलता न जाने।

जीवामि....

सज्जीकृता समक्षं
नयनाभिरामशाला
उच्छेदनं प्रवृत्तं
मूले कदा न जाने।

जीवामि....

वस्तुक्रयाय चलितो
जनदापणे स्थितोऽहम्
पण्यीकृतो ममात्मा
क्षणकैः कदा न जाने।

जीवामि....

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



चत्वरमिदं समन्तात्
बहुजनसमाकुलं रे
मानोऽत्र मानवानां
क्व नु नीयते न जाने ।
जीवामि····

कम्पितपदैः कथञ्चित्
सुक्षतपदं प्ररूढः
प्रक्षालितोऽपि बहुश-
स्तिष्ठामि किं न जाने ।
जीवामि····

आचरमहं जनेभ्यो
व्रतममृतदानमनिशम्
स्वगले निधाय गरलं
विचरामि किं न जाने ।
जीवामि····

देवार्चनाय कुसुमं
यावच्चिनोमि सुचिरम्
बहुकण्टकैः क्षतं हा
मम गात्रकं न जाने ।
जीवामि····

प्रज्वलति काननेऽस्मिन्
द्वेषानलः करालः
क्व नु यापयानि ससुखं
दिनमेकमपि न जाने ।
जीवामि····

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



भीतो हि सिंहघाताद्
वागुरिक - बाणपातात्
मृगपोतको मनो मे
जीवेत् कथं न जाने।

जीवामि....

अयि मम जिजीविषे ! त्वं
जीवेः सुदीर्घकालम्
अथवा वृणीय मृत्युं
कतिधाधुना न जाने।

जीवामि....
मज्जामि....



Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# सङ्गमः

गङ्गा-यमुनयोः सङ्गमः
सित-नीलकान्त्योः सङ्गमः ।
तीर्थे प्रयागे राजते
पावनसुनद्योः सङ्गमः ॥

चलवीचिमालोद्वेलनम्
धारावलीनां मेलनम् ।
भारतजनन्या उरसि वै
वर - हारमाला - खेलनम् ॥

गङ्गा........

जलतले नौकासङ्कुलम्
प्लवनं समन्ताज्जनबलम् ।
वृद्धा युव - स्त्री - बालकाः
समतया स्नान्ति सुनिर्मलम् ॥

गङ्गा........

जल एव साञ्जलिवन्दनम्
भालेषु विलसति चन्दनम् ।
पुष्पैः पयोभिर्दीपकैः
सज्जनैः सरिदभिनन्दनम् ॥

गङ्गा........

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



वितत्तं तटं पृथु सैकतम्
सुरमन्दिरं घण्टारुतम् ।
विविधाः पताकाश्चिह्निताः
विलसन्ति गगने सन्ततम् ॥
गङ्गा........

माघे सुमेला-योजनम्
बहु-साधु - भक्त- सुयोजनम् ।
उटजेषु कल्पनिवासिनां
व्रत - यजन -पूजन-भोजनम् ॥
गङ्गा........

पृथुदुर्गवान् यामुनतटः
सुरमूर्तिमध्येऽक्षयवटः ।
सुस्तम्भलेखो राजते
तत - गुप्तनृप -गुणगण-पटः ॥
गङ्गा........

संस्कृति - सुधारा - सङ्गमः
राष्ट्रिय - विविधता-सङ्गमः ।
सङ्घटन - संस्थापन - परः
जयतात् त्रिवेणी - सङ्गमः ॥
गङ्गा........

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# सङ्घटनम्

बहुदुःखैर्लब्धं स्वातन्त्र्यम्
सुस्थापितं महद् गणतन्त्रम्
राष्ट्रं न हि मे खण्डय रे!
देशं न हि मे भञ्जय रे!!
भारतमातः! जय जय हे!!!

एका भूमिर्माता भूमि-
वंयमस्याः सत्पुत्रा रे।
वायुर्जलं प्राणदं पूतं
वै मृत्तिका पवित्रा रे॥
नैके प्रान्ता आत्मा चैकः
आत्मानं न हि विगणय रे
राष्ट्रं.......

गङ्गा यमुना शिप्रा रेवा
वेत्रनर्मदे सरितो रे।
प्रवहन्त्यो वै शिरास्वरूपा
इह प्राङ्गणे परितो रे॥
गर्वोन्नतं हिमालयमौलिं
सह मानेन निभालय रे
भारत........

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



तालैर्युता तमालैर्नीला
परिणतजम्बूश्यामा रे।
सर्षपपीतारुणा पलाशैः
सेयं भूरभिरामा रे॥

हरिदाभाभरितां वनराजिभि-
रवनिमिमामवलोकय रे
देशं·······

महाराष्ट्र - कर्णाटक - बङ्गा
गुर्जर - केरलदेशा रे।
हरि-मरुभू - बिहार-गोवान्ध्रा
उत्तर - मध्यप्रदेशा रे॥

सर्वे ह्यवयवा जननीदेहे
समदृष्ट्यैव विभावय रे
भारत·······

कश्मीरोऽस्याः सुरभितभालं
पञ्चनदो हृद्देशो रे।
असमः समताभावभावितो
भव्यस्तमिलप्रदेशो रे॥

सौहार्देन समस्यानां त्वं
समाधानमन्वेषय रे
राष्ट्रं·······

जाति - वर्ण - वर्गादि -विभेदै-
र्भाषा - भूमिविवादैः रे।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



नान्तःकलहानलो ज्वलतु
न च रुधिरं स्रवतु प्रमादैः रे ॥
अयि मम मातृकुटुम्बकात्मज !
त्वं सोदरं न घातय रे
देशं.......

किं लब्धुं नूप्रत्वं रोषो-
ऽत्यातङ्कः संहारो रे।
एकगृहे वसतां बन्धूनां
मध्ये हाहाकारो रे ॥
बान्धवरक्तपानभरितं
न पुनर्भारतमावर्तय रे
भारत.......

गान्धि - सुभाष - भगतसिंहानां
विलपत्यात्मा नूनं रे।
मत्तान्धैर्वंशजैरर्पितं
तेभ्यो रक्तप्रसूनं रे ॥
द्वेषविषं निर्वापय देशे
प्रेमामृतमभिवर्षय रे
भारत... ....

प्राणा हुताः सहस्रैर्वीरैः
शिरःसहस्रं छिन्नं रे।
बहुबलिदानैस्त्यागैर्लब्धं
राज्यं तदपि च भिन्नं रे ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



अद्याप्यङ्गच्छेदे मातु-
र्लग्नस्तं बहु दण्डय रे
देशं……

भाषा - जाति - रीति-परिधानं
प्रतिभागं च विचित्रं रे ।
नैकत्वे दृश्यते सदैकं
भारतमातुश्चित्रं रे ॥

देशद्रुहं दूरमपसारय
सङ्घटनं संस्थापय रे
भारत……

●

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# अभिनन्दनम्

गिरिवरैः कृतमभिनन्दनम्
तरुवरैः कृतमभिनन्दनम्
इह परम् ऋतुराजोदये
सकलैर्न कृतमभिनन्दनम्

फुल्ला लता नवकिसलयाः
तरु-कुसुम - सौरभ - सञ्चयाः ।
विततं विकासमवेक्ष्य भुवि
केषाञ्चिदश्रुस्यन्दनम् ॥
गिरिवरैः........

मम सन्तु नाम सुकण्टकाः
तेषाञ्च सुमनोमालिकाः ।
नन्दतु जनो यदि रोचते
मम वेदनायां नन्दनम् ॥
तरुवरैः........

उच्चैः सततमारोहणम्
धृतमिदं व्रतमतिशोभनम् ।
नीचैर्ममाकर्षणपराणां
किमतः परं पररन्धनम् ॥
सकलैः........

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



समुदिते चन्द्रे ह्लादके
म्लानतां यानि धरन्ति वै ।
कमलानि तानि भजन्ति किं
जीवितमृतं सुस्पन्दनम् ॥

गिरिवरैः........

ज्वलिते करालदवानले
प्रसृतेऽधिकं द्वेषे छले ।
अवरक्षणाय कृतं मम
जातं ह्यरण्यक्रन्दनम् ॥

तरुवरैः........

मम बहुविकासश्चोन्नतिः
जायेत तेषामवनतिः ।
जातं कठिनजडताकरं
मम भावधारास्यन्दनम् ॥

गिरिवरैः........

अनुदिनं सज्जनता हृता
क्षयमेति हन्त मनुष्यता ।
लुण्ठकसमाजे दृश्यते
दौर्गत्य-दुःखविवर्धनम् ॥

सकलैः........

मृदुता सतां मनसः सदा
कुत्सितजनैः सोढा कदा ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



अयमेव दोषः साम्प्रतं
विषमेव नेदं चन्दनम् ॥
तरुवरैः……

नेष्यते चौरैश्चन्द्रिका
तेषां सुधाऽपि न रञ्जिका ।
हठिभिर्न कर्तुं शक्यते
गुणगण - महिम्नो वन्दनम् ॥
गिरिवरैः……

तेजस्विनां तु चमत्कृतिः
नियतात्मिका तु समुन्नतिः ।
धर्मः सदाग्रे प्रचलनं
बहुविधविरोधोल्लङ्घनम् ॥
गिरिवरैः……

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# सङ्घर्ष-सातत्यम्

अमृतास्वादो न हि तैर्ज्ञातो
यैः पीतं गरलम्
अहर्निशं गरलम्

जलमध्ये विचरति मम तरणिः।
नदसन्तरणमेव मम सरणिः॥

भ्रमति चक्रवाते मग्नाऽसौ
गच्छति रसातलम्
यैः पीतं......

दैन्यं मम मत्तानां क्रीडा।
याच्ञायामधमे न व्रीडा॥

घृणितानामनुकम्पाग्रहणं
कटुकं हलाहलम्
यैः पीतं......

अन्याये क्व मणीनां दोषः।
सम्मुखेऽपि पापे नो रोषः॥

कुपरीक्षकैरर्घतः पातः
न हि सहनं सरलम्
यैः पीतं......

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



अत्याचारं कृत्वा नादः ।
उपदेशः सोऽयं विधिवादः ॥

आचार्यस्याचरणात् पतनं
अधिकं छलं बलम्
यैः पीतं······

न्यायतुला यत्करे रोपिता ।
तैः खरेषु गजता हि घोषिता ॥

नमति समाजोऽनिच्छन्नपि रे
विवशः खरं खलम्
यैः पीतं······

अनन्येषु बहुशो बहुनमनम् ।
अनभिलषितलोकैः सङ्गमनम् ॥

उदरदरीभरणाय दीनता
नश्यति मनोबलम्
यैः पीतं······

परमानस्य भञ्जने प्रीतिः ।
लघुवृत्तीनामेषा रीतिः ॥

लघूकृत्य क्रीणाति जनो मां
निजं यशो धवलम्
यैः पीतं······

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



कठिनदुःखसहनं मे चर्या।
विनय-मौन-शीलं हि सपर्या॥

सङ्घर्षैः सह चरणे वीतं
जीवितमिह सफलम्
यैः पीतं·····

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# अयि मे विमानराज

चल बहुदूरम्
नय बहुदूरम्

अयि मे विमानराज रे !
अय्यम्बराधिराज रे !!
चल बहुदूरम्
नय बहुदूरम्

निर्मलता हृदयेषु न यत्र
व्यवहारे सारल्यम् ।
नीडं तं परिहाय खगपते
गगने भज तारल्यम् ।।
पक्षान् निजान् प्रसार्य रे
नवपवनं ह्याकार्य रे
चल बहु०......

तमसावृतमन्तः करणं हा
नौज्ज्वल्यं न प्रकाशः ।
दीपो नैव रोचते नव्यो
निर्वाणे तु प्रयासः ।।
अन्धत्वं संकृष्य रे
नवमयनं सन्दर्श्य रे
चल........

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



शुचिशालासु समुन्नयनाय
यत्र खराणां चयनम् ।
गुणि-गुण-गणना-काले महता-
मवरुध्यति रे नयनम् ॥
गरलमपीह निपीय रे
घनजडतामपनीय रे
नय........

हृदये कटुता मुखे मधुरता
द्विजिह्वत्वमधिमञ्चम् ।
आलापे ननु वागसंस्कृता
बहुवञ्चना - प्रपञ्चम् ॥
बहुशो विद्धीभूय रे
नवशक्तिञ्च प्रसूय रे
चल........

न हि रोचते मार्दवं तेभ्यः
सौन्दर्यं न सुगन्धः ।
कुसुमैः सह मर्दनं धूसरी-
करणमेव सम्बन्धः ॥
गुणहन्तॄन् सन्त्यज्य रे
पङ्किलताञ्च विसृज्य रे
नय........

विकसन्तं कोरकं न सहते
यत्र सुकण्टकजालम् ।
सततं सङ्घर्षण - परम्परा
उद्धर्तुं स्वं नालम् ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



तत् स्थानं त्वपहाय रे
मालिन्यं हि विहाय रे
चल·······

द्वारे द्वारे भ्रमति हि चन्द्रः
रजतामृतं दधानः ।
मिलितो नैव ग्रहीता कश्चिद्
भुवि केवलमवमानः ॥

ह्लादकतामाकुञ्चय रे
रसवर्षां सङ्कुञ्चय रे
नय·······

वाग्वज्रास्त्रो कठिनं झञ्झा
नो वर्षा हिमपातः ।
मुक्ते प्रकृतिप्राङ्गणे न स्यान्
मनुजकृतो ह्याघातः ॥

नवमुदयं संवीक्ष्य रे
आशां नवां प्रतीक्ष्य रे
चल·······
नय·······

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# योरोपीयम्

अयनं विततं नयनं चकितं
प्राविशं यदा नवसंसारम् ।
दृश्यं भव्यं सकलं नव्यम्
आगतो यदा सागरपारम् ॥

भाषा भूषा वैविध्यमयी
इह चित्रविचित्रं परिधानम् ।
नवदेशो वेषः परिवेशः
सर्वं हि समुज्ज्वलमागारम् ॥
अयनं.......

परितो विज्ञानचमत्कारा
बहु-चाकचिक्य-सुन्दररचनाः ।
भव्यानि नैकभवनानीक्षे
बहुविधमुद्योग - व्यापारम् ॥
अयनं.......

गगने जलमध्ये धरणितले
तीव्रं धावन्ति यानमालाः ।
नो दूरे किमपि न काठिन्यं
गमनागमनं वारं वारम् ॥
अयनं.......



Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



यन्त्रैरशनं वसनं श्वसनं
यन्त्रैर्बद्धा जीवनचर्या ।
इह याति यन्त्रमानवमाला
नीत्वा नवयुग-संस्कृति-सारम् ।।
अयनं.......

वनिताः स्वातन्त्र्यसमापन्नाः
सहकर्मपरा बहुकर्मपराः ।
नो दैन्यं लघुता दौर्बल्यं
भुञ्जते सदा निजमधिकारम् ।।
अयनं.......

पारस्परिकः प्रणयो हृदि चेद्
गोपनं कथं कस्माल्लज्जा ।
विदधति सर्वत्र जनस्थाने
यूनां युग्माः केलिविहारम् ।।
अयनं.......

विपणिषु विविधा वैभवलासा
लोचने चमत्कृतिकरा अहो ।
चपलावत् परितश्चञ्चन्त्य-
श्चिन्वन्ति रमण्यः सम्भारम् ।।
अयनं.......

तामसमशनं मदिरापानं
नर्तन - वादन - सङ्गीतमहो ।
विलसत्सौधेषु जना नैके
भुञ्जते सुभोगसमाहारम् ।।
अयनं.......

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



मूले तु त एव मनोभावा:
अन्तरमन्तरा प्रयोगे वै।
कुर्वन्ति प्रतीच्या: प्रायेण
संस्फुटमाचारं व्यवहारम्॥
अयनं........

त्वरिता हि गति: कार्येषु रुचि-
र्नालस्यं नैवोदासीन्यम्।
सन्ततं श्रमो विश्रामो वा
जीवितं नो विना सञ्चारम्॥
अयनं........
दृश्यं........

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# आयाति स्मरणपथम्

दूरे वसतो मे
कोऽयमायाति स्मरणपथम्
तदाप्यायाति स्मरणपथम् !

सुजला सा सुफला मे भूमिः
दूरात् प्रणमामः ।
कुर्मो गुणगानं सर्वत्र हि
क्वचिदपि गच्छामः ॥

विध्यति हृदयं स्मरणे तस्याः
तत् कथयामि कथम् ?
कोऽयमायाति.... .... ...

ग्रामे मे वेदिका, प्रदोषे
जनाः सुखासीनाः ।
बन्धुमित्रभावं पुष्णन्तो
विविधकथालीनाः ॥

भुवनं द्वेषाग्निना तदपि रे
उच्छिन्नं सहठम् ।
कोऽयमायाति... ... ...

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



नगरे चारूद्यानं विततं
जनसङ्कुलमनिशम्।
लुण्टाकैर्वृतमिवं समन्ताद्
दुरिताचारगृहम् ॥

विटपास्ते वाटिकागता मे
सन्दिशन्ति किं किम्।
तदाप्यायाति.... ... ....

बालानां श्रावणे दोलनं
सरसलोकगीतम् ।
नात्र दृश्यते होलीरङ्गः
षड्ऋतुसङ्गीतम् ॥

रक्तरञ्जनं केनारब्धं
मम देशे सततम्।
कोऽयमायाति.... ... ....

हिंसा नाकर्णिता, दृश्यते
नो हाहाकारः।
पथि गच्छन्त्या भवति युवत्या
नैव बलात्कारः॥

स्वैरमलिक्रामति बालाऽत्र
मार्गं विरलजनम्।
कोऽयमायाति.... ......

नैव वधूनां दाहो नित्यं
लुब्धैः श्वसुरवरैः।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



पाणिग्रहणं विहितं यैर्हा
हत्या तैर्हि करैः ॥

एकस्मिन् वर्षेऽमरलोकं
गमयति वधूरथम् ।
तदाऽप्यायाति… … …

कुत्सितनीतिकर्दमे ग्रस्ताः
सारस्वतगेहाः ।
शुचिभवनं विषधराः प्रविष्टाः
धृतमानवदेहाः ॥

सकलजगच्चारित्र्यशिक्षक !
ते किमिदं रूपम् ।
कोऽयमायाति… … …

दारुणदुःखं ददति हि पठिताः
श्रुताः समाचाराः ।
नावरुध्यते हननं त्रासः
बहुभ्रष्टाचाराः ॥

स्वेच्छाचरणं मनुते सर्वः
स्वातन्त्र्यस्यार्थम् ।
तदाऽप्यायाति… … …

किं जात्या प्रान्तेन भाषया
धर्मसम्प्रदायैः ।
बन्धुर्बन्धुं हन्ति कथं हा
कैर्नैकोपायैः ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



शान्तिदूत ! सदहिंसाप्रेरक !
त्वां पश्यति विश्वम् ।
सदाऽध्यायाति…… … …

बहुदोषामपि निशां स्मरामि
दिवसान् रमणीयान् ।
प्रावृण्मधुमासान् नगराणि च
ग्रामान् कमनीयान् ।।

समयचक्रपरिवर्तित ! हे त्वां
विस्मरामि नोऽहम् ।
कोऽयमायाति…… … …

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# याति रजनी

याति रजनी, याति रजनी
कथं कथमपि याति रजनी

धवलवसना नीलनीला
रुचिररशना ललितलीला ।
नवनवा नवयौवनेव
तारकाभरणा सुनयना ॥

विविधरूपाण्यादधाना
शनैः शनकैर्याति रजनी
कथं कथमपि……

इन्दुकिरणैः स्नापिता सा
जलदशकलैराचिता सा ।
क्वचित् क्वचिदुन्मत्ततारा
बहुविकारा विरलचारा ॥

सरन्ती गगने धरायां
लघुपदैर्निर्याति रजनी
कथं कथमपि……

स्मृतिपिटकमुद्घाटयन्ती
हृदयकलिकां ह्लादयन्ती ।
प्रथमप्रावृड्बिन्दुवत् हृद्धरणिसुप्तां
वेदनामुल्लासयन्ती ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



निर्दया करुणाविहीना
निजपथे सा याति रजनी
कथं कथमपि······

क्वचिच् चञ्चति दामिनी सा
सञ्चरन्ती कामिनी वा ।
भ्राजमाना राजमाना
आगता याता क्षणे संसेव्यमाना ॥

यथा माला वारिदानां
नभसि वाते वाति, रजनी
कथं कथमपि······

यामिनी दिवसप्रणयिनी
विमलतरला भवतु जयिनी ।
रहसि बहुरतिकेलिशीला
धृतव्रीडा कृतक्रीडा ॥

मदनबाणान् प्रक्षिपन्ती
मृदुपदैरुपयाति रजनी
कथं कथमपि······

कल्पनारथमधिशयाना
एकले द्वित्वं दधाना ।
क्वापि सूते सुधावर्षं हृदयहर्षं
बहुसरसताभादधाना ॥

मृदुलमानसभावतन्तून्
स्वप्नकैः पुष्णाति रजनी
कथं कथमपि······

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



दीर्घदीर्घं स्वप्नजालम्
शनैरतिवाहयति कालम् ।
सुसलिले शफरीचलनमिव
हृत्तडागे भावचलनम् ॥

चन्द्रताराभिर्विदेशे
स्वीयतामुपयाति रजनी
कथं कथमपि·····

मृदुलमधुरः प्रेष्यभावः
काव्यरसपूरित-शरावः ।
याति तिमिरे, सरति मिहिरे
दिक्षु प्रसरति खगविरावः ॥

शनैस्त्रीन् यामानतीत्य
तुरीयं प्रति याति रजनी
कथं कथमपि·····

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

## पातन-यन्त्रणा

यतो यतो लघूकृतो जनैः
ततस्ततो गतोऽहमुच्चकैः

अधो निपात्य मे कदर्थना
कृता श्रुता न तर्हि प्रार्थना
हृतं कुमारकोरकाग्रवं
सुसत्त्वमस्य हा शनैः शनैः ।
ततस्ततो……

भुजद्वयं न सोढुमक्षमः
जनोऽस्ति कृन्तने कृतश्रमः
चतुर्भुजत्वमेत्य रे परं
सुवृद्धिमागतो घुणाक्षरैः ।
यतो यतो……

करे निगृह्य कन्दुकीकृतः
क्षिप्त एव हा क्षितौ श्रितः
समुच्चलामि रे नभः स्वयं
निसर्गजं कृतं हि खेलनैः ।
ततस्ततो……

भानुनाग्निवर्षिभिः खरैः
तापिता मही निजैः करैः

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



चिरस्य तापहारणं कृतम्
इयान् रसोऽभिवर्षितो घनैः ।
यतो यतो.......

ऋजुः सृतिः सदैव रे वृता
गतिः समानरेखया कृता
वक्रतामजानता मया
हारितं न किं निजं खलैः ।
ततस्ततो.......

समुत्थितोऽपि भूरि पातितः
तपामि धूलिधूसरीकृतः
ततोऽलभे समुज्ज्वलं मणिं
विलोकितोऽस्मि सेर्ष्यलोचनैः ।
यतो यतो.......

आत्मनैव कल्पयन्ति ते
मां लघुं प्रदर्शयन्ति ते
पुरो ममैव दीर्घरेखिका
निर्मिताः स्वतोषणाय तैः ।
ततस्ततो.......

अहो जनस्य का विचारणा
तदुत्सवो मदीययन्त्रणा
स्यां समुच्छ्रितोऽधिकं तदा
पोषितस्तदीयपातनैः ।
यतो यतो.......
ततस्ततो.......

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# पाश्चात्त्यकरैर्लालिता

पाश्चात्त्यकरैर्लालिता शोभते
प्राच्या संस्कृतवाणी।
उल्लसति रसेन पालिता तैः
भारतभारती पुराणी॥

उदितः प्राच्यां दिशि रविः
सहितः करजालेन।
विच्छुरिताः किरणास्तदा
यूरोपेऽपि समेन॥

समधिककालविलम्बेनैव
सुविदिता जातेयं कल्याणी।
पाश्चात्त्य........

विषयीकृता सुसेविता
सुगृहीता स्वयमेव।
बहुविधभावैर्भाविता
परिपालिता सुतेव॥

विविधशोधं विधाय सञ्जातः
पाश्चात्त्यो हि प्राच्यविज्ञानी।
उल्लसति........

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



क्वचिदज्ञात - निगूहित
प्रन्थस्योत्खननेन ।
हस्तलेखमालिख्य वै
पुरतः प्रकाशनेन ।।

बहुविधभाषान्तरकरणैर्या
सुसमृद्धा जाता शुचिवाणी ।
पाश्चात्य.......

विविधसमीक्षालोचनै-
रुद्घाटितं सुमर्म ।
कृतं प्रतीच्यमनीषिभिः
प्राच्यमुनीनां कर्म ।।

बहुपुस्तक - पुष्पैराचिता
ऋषिसमैः सुरभाषारण्यानी ।
उल्लसति.......

वेद - पुराण - स्मृति - कथा-
नाटक-सत्काव्येषु ।
पुरावृत्त-दर्शन-कला-
धर्म-नीति-शास्त्रेषु ।।

विविधविषयेषु विलिख्य विचारान्
व्यक्ता वाग्देवता भवानी ।
पाश्चात्य.......

अन्ताराष्ट्रियगोष्ठी-
सम्मेलन - सङ्घेन ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



गमितं संस्कृतवाङ्मयं
विश्वप्रसिद्धिमनेन ॥

सकलभुवि गमिता ख्यातिं गता
जगति वन्द्या सुरगवी समानी ।
उल्लसति........
पाश्चात्य........

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# नवाभ्यागमनम्

नवास्तरङ्गा बहुविधभङ्गा
मानसरसि समुदिता मे ।
अयि नवातिथे ! तिथिं विना त्वं
गेहेऽन्तः किं गमिता मे ॥

नैवासीत् परिचयगाढत्वं
किमपि न वृत्तमतीतं रे ।
खट्खटायितं द्वारे नैव हि
वाद्यं नैव च गीतं रे ॥

नवजलकणिके ! हृदयधराया-
मार्द्रत्वं चानीतं रे ।
मादकसुरभिमृंद उत्थिता
आतपतपनं वीतं रे ॥

नवोद्गते कलिके ! नूनं ते
प्रथमो हासविलासो रे ।
तव मृदुस्मितं वदत्यादिमो
ह्यनुभूतो मधुमासो रे ॥

त्वया तरङ्गिणि ! रचितमात्मना
निजं प्रवाहस्थानं रे ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



शैत्यं ते समन्ततो विततं
रुचिरकलकलध्वानं रे ॥

अपटीक्षेपेणैव प्रविश्य
कला दर्शिता स्वीया रे।
स्वगतं ते कथमपि विदितं हा
भावततिः कमनीया रे ॥

अभ्यागते ! शुभां नवतां मे
जीवनपथे प्रसारय रे।
ते सत्क्रिया भावनैव हि मे
स्वीकरणाय विचारय रे ॥

●



Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# रसस्वदनम्

खण्डितो मा नूनमदीयो मधुरभावः
अतो नान्यद् भावनं विहितं मया रे।
तव हि सान्निध्यक्षणानां सुप्रभावः
एकमेव रसामृतं रसितं मया रे॥

मृदुल - तरल - सुभावनानामियं गङ्गा
नद-नदी-सलिलं समागच्छति हि नूनम्।
परं भजते तदपि गाङ्गसुपावनत्वं
सुसलिलं तु तदेव सुस्वदितं मया रे॥

खण्डितो......

श्रुता नैके सुमधुरा वाणीविलासाः
कुसुमसौरभगर्भिते नु वसन्तकाले।
समाकर्ण्य कलं तु कलकण्ठीरवं वै
नापरं संश्रव्यमभिलषितं मया रे॥

खण्डितो......

अयि कृतं तव मदिरलोचन-चषकपानम्
पेयमन्यत् सकलमपि विरसायितं तत्।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



नीयते नयनायने यत् किमपि ध्येयं
चित्रमेकं तवैवारचितं मया रे ॥

खण्डितो........

तव मधुरवचनावलीनां रसामोदः
प्रिये ! ह्यतिशेतेऽपरानानन्दविषयान् ।
अहं तव सन्निधि-सुधा-लुण्ठने लग्नः
किमपि नान्यत् कस्यचिन्मुषितं मया रे ॥

खण्डितो........

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# मनोमन्थनम्

अद्य पुनरपि मन्थनं रे
हृदय - सागर - मन्थनं रे

बह्वोः कालान्नैव जाताः ।
तीव्रवेगाश्चक्रवाताः ॥

पुनर्भावस्पन्दनं रे
अद्य.........

इन्दुरेकः समुदितो रे ।
नवविकारो हृदि कृतो मे ॥

जलधिसलिलोद्वेलनं रे
अद्य.........

मनो मे दोलाधिरूढम् ।
घृतमधुर - मृदुभाव-मूढम् ॥

अयि करोति हि नर्तनं रे
अद्य.........

सागरादमृतस्य दानम् ।
सुरैर्विहितं सोमपानम् ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



नवसुधायाः स्यन्दनं रे
अद्य.........

मनोरज्जुविकर्षणं रे ॥
सदसतां सङ्कर्षणं रे ॥

उभाभ्यां बलदर्शनं रे
अद्य.........

उदेष्यति ननु नवतटः किम् ।
अमृतरसभरितो घटः किम् ॥

किमपि भविता झम्पनं रे
अद्य.........

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# क्रीडनपीडनम्

मृशं मे मनः पीडितम्
यथेच्छं जनैः क्रीडितम्
पीडया क्रीडितं क्रीडया पीडितम्
किं विचित्रं कृतं रे हितम् !

गर्दभाश्चन्दनैर्लेपिताः ।
उच्चसिंहासने रोपिताः ॥

भूरि धूलिं लिहन्तीह रे दन्तिनः
सिंहराजैः सुदैन्यं धृतम्
मृशं........

सत्कृता नैव वाक् संस्कृता ।
जनन्येव हाऽऽधःकृता ॥

धिङ् निजात्मैव गेहे निजे हन्यते
गौरवं केन सर्वं हृतम्
मृशं........

कालधूमैः सुकृष्णीकृता ।
ज्वाल्यते हन्त मृद्वी लता ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



दग्धमन्तःपुरं  होम्धवैर्बालिशैः
रक्षणीयं  द्रुतं  ज्वालितम्
मृशं……

यथोक्तैर्महद्भिर्जनैः  ।
किं  न  क्रीतं  प्रभूतैर्धनैः ॥

आत्ममानो  धनैरेव  विक्रीयते
मानवैर्दानवत्वं  धृतम्
मृशं……

हन्त  दुष्काल  एवागतः ।
अन्तरात्मा  दरिद्रीकृतः ॥

मानुषो  मूल्यवत्तेह  हा  हीयते
वैपरीत्यं  न  किं  किं  कृतम्
मृशं……

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# केयं कदर्थना

कृतं कण्टकैरेव सौहृदं
केयं कदर्थना !
कृतमविरतं मया विषपानं
का मेऽवमानना !!

वह्निर्नैव विराममेति हा
सकलमिदं दग्धम् ।
जीवनपथे प्राप्यते यत् तद्-
धीन्धनायते स्वम् ।।

जाता व्यथा सखी मे सततं
स्वल्पा वाऽथ घना
केयं........

किं शूलं वेदनमपि दुःखं
किं स्याद्यदि मरणम् ।
झञ्झावातोत्पातशतानां
कृतं स्वयं वरणम् ।।

वारं वारं गेहद्वारं
समायाति यन्त्रणा
केयं.......

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



अयि मे मृदुहत्कुसुम ! सर्वदा
किं किं न हि सोढम् ।
आतप - शीतोपल - वृष्टीना-
माक्रमणं वोढम् ।।

सहनमेव जीवनचर्याया
जाता सन्धारणा
केयं·······

वात्याभिर्लघुदीपस्य नु किं
रक्षितो हि मानः ।
ज्वलनं नो शक्यं भुवि तस्य तु
नियतिर्निर्वाणः ।।

रोदन एव सुहासाभ्यासः
कियती विडम्बना
केयं·······

विषकीटैः शतशो दष्टस्य तु
देहं दशति जनः ।
आक्रान्तस्याघातव्रातैः
कोऽपि दुनोति मनः ।।

अधःकृतस्याधःकरणाय
कथमियती यातना
केयं·······

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# कियद् विषमवशिष्टम्

कियद् विषमवशिष्टमधुना हा घटे ते
मया पीतं पुनः परिपीतं तु सकलम् !

कियद् विषधरजालकं पिहितं नु पिटके
मया त्वन्मुक्तं धृतं तन्माल्यममलम् !!

सन्ति सन्निहितानि त्वत्पार्श्वे तु बन्धो
बहून्युपकरणानि मनसश्चालकानि ।
विरम सम्प्रति निजनियोगाद् दुर्विपाकाद्
बहु मनोमालिन्यमाप्तं मया प्रबलम् ।।
कियद्……

मे समुन्नति - समारोहण - सत्पथे रे
त्वयाऽऽकलिता नैकशः पातनोपायाः ।
पतँल्लुठन् समाश्रयन् सततं कथञ्चित्
ह्यधिगतं कण्टकान्तरितं मया सुफलम् ।।
मया……

मम गुणेष्वपि दोषबिन्दून् पश्यतस्ते
काकदृष्ट्यां मया दृष्टा तोषरेखा ।
गुणमयी रज्जुर्न हस्तान्मया मुक्ता
येन नापतमहं त्वमिव तु कूपसलिलम् ।।
कियद्……

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



उपकृतं बहु भर्त्सनैरवमाननैर्मे
अधःकरणैरूर्ध्वंचलनं मम तु जातम्।
परीवादपरम्पराधूमैर्न म्लानं
प्रसृतमधुना समधिकं मे यशो विमलम्॥
मया·······

अरे प्रक्षिप नाधुना विषदग्धबाणान्
सरललक्ष्ये विषमघातो नैव सह्यः।
परुषवाग्भिर्विषममाधिं वर्धयन् भोः
कियद् वचनं शिष्टमधुना मुखे कुटिलम्॥
कियद्·······
मया·······

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# उड्डीयते विमानम्

उड्डीयते विमानम् !
गच्छति वियति विमानम् !!

भूमौ चलति सुमन्दं पूर्वं
पश्चाच्चलति सवेगम् ।
अवनितलादुत्थाय क्रमशो
धावतीदमभिमेघम् ॥

विदधत् तीव्रं ध्वानम्
उड्डीयते.......

पवने करौ प्रसार्य याति किं
गगने पवनसुतोऽयम् ।
खेचरराजः खे धावति किं
धृतलम्बितपक्षोऽयम् ॥

शिरसि हि धृत्वा मानम्
उड्डीयते.......

उल्लसितं विलसितं जीवनं
खेलतीह सम्पूर्णम् ।
भूमेर्दूरं वाताभिमुखं
नभसि नु गच्छति तूर्णम् ॥

यन्त्रनिर्मितं यानम्
उड्डीयते.......

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



धवला धवला हिममाला वा
घनमाला गिरिमाला ।
जलनिधिजलमालाऽवलोक्यते
प्रकृतिसुलीलामाला ॥

विगतं भेदज्ञानम्
उड्डीयते........

हिम - वर्षोपल - वात्याचक्रं
दृढं भेदयत् सर्वम् ।
मेघसमूहान्तरितमपीदं
याति निशासु सगर्वम् ॥

विपरीतं सहमानम्
उड्डीयते........

सुललितदेहाः सुस्मितशीला
नववसनानि दधानाः ।
परिचर्यानिरता नवबाला
रसवर्षा तन्वानाः ॥

आकर्षन्ति ध्यानम्
उड्डीयते.......

स्वादु भोजनं नव्यमोदनं
विविधफलरसं पेयम् ।
मिष्टान्नं लावणिकं शाकं
परिवेषयति मुदेयम् ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



वर्षन्ती प्रेमाणम्
उड्डीयते.......

अमरीकी रूसी फ्रांसीयो
भारत-जापानीयः ।
लङ्का - चीन - जर्मनीवासी
कश्चिदाङ्ग्लदेशीयः ॥

याति निजनिजं स्थानम्
उड्डीयते......

काचिदेकला तरुणी तरुणा
वृद्धाः केचिद् बालाः ।
केऽपि समूहनिबद्धयात्रिणो
विविधजनानां मालाः ॥

भवति विविधताभानम्
उड्डीयते.......

विश्वभ्रमणं स्वजनैः सह
मेलनं कर्तुमप्येके ।
शैक्षणिकीं सांस्कृतिकीं यात्रा-
मौद्योगिकीमनेके ॥

कुर्वन्ति प्रस्थानम्
उड्डीयते.......

नैकेषां देशानामिह
भूखण्डानां सङ्घटनम् ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



समग्रा हि वसुधैव कुटुम्बं
दृढीभवति वै वचनम् ।।
प्रसरति जगति ज्ञानम्
उड्डीयते……

जीवननिर्भिमादायामूल्यं
शतमारोहति गगनम् ।
पुनरवतीर्य ददाति जनन्यै
भूम्यै सर्वं स्वजनम् ।।
सततं सेवादानम्
उड्डीयते……

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# नवं युगम्

नवसभ्यता समन्ताद् धावति
सन्ततमतिद्रुतम् !
इह प्रवासे पेरिसवासे
प्रपश्यामि सर्वम् !!
किमिदं नवं युगम् !!!

पथि पथि राजपथे विपणौ वा
भुवि याने याने ।
जनसम्मर्दः क्व नु गच्छति रे
नभसि वायुयाने ।।
सत्वरतास्ति समेषां, पृच्छति
को नु कस्य वृत्तम्
किमिदं.... ....

यन्त्रनियमिता जीवनचर्या
यान्त्रिकोह वेला ।
यन्त्राधृतं कर्मकर्तृत्वं
यन्त्रे जनमेला ।।
यन्त्राणि प्रसरन्ति हि दिशि दिशि
कम्प्यूटरसहितम्
किमिदं.... ....

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



यौवनभारानतालसा सा
गजगमना रमणी ।
विगता कविकल्पनाचित्रिता-
ऽधोवदना तरुणी ॥

आधुनिकीयं याति न मन्दं
नो वा वैलक्ष्यम्
किमिदं…… …

परश्शतं परिधानजालकं
भूषणवैविध्यम् ।
नव - नवलेपनविषयो नैके
सज्जाबाहुल्यम् ॥

अनावृतार्धाङ्गं विलसति वै
सूक्ष्मं लघु वसनम्
किमिदं…… ….

मिथश्चुम्बनालिङ्गनबद्धं
नरनारीयुगलम् ।
भवेत् सार्वजनिकं स्थानं वा
गन्त्रीस्थानमिदम् ॥

प्रेमदर्शनं नैव मन्यते
रहसि हि करणीयम्
किमिदं…… ….

कामापणे दर्श्यते स्वैरं
लोकान् नग्नत्वम् ।



Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



यौनदर्शनं चित्रादिषु
लज्जाया भग्नत्वम् ।।
अतिकामुकतामयं स्वरूपं
नार्याः संदृष्टम्
किमिदं.... ....

विविधवस्तु - बहुमूल्यवैभवं
द्रव्यभव्यवृन्दम् ।
आकारयति जनान् निजपार्श्वे
चरतः स्वच्छन्दम् ।।
भवसमृद्धि - मायाजालेऽस्मिन्
परितो भ्रमाम्यहम्
किमिदं.... ....

उषितं पूर्वबर्लिने हि मया
पश्चिममपि यातम् ।
लिपजिग - वाइमार - हाले-
ड्रेस्डनमपि संज्ञातम् ।।
पूर्वजर्मनीयात्रा जाता
मासत्रयात् परम्
किमिदं.... ....

पश्चिमशर्मण्येऽपि शर्मणा
बौन - क्लोन्नगर्यौ ।
हौलैण्डेऽवलोकिते
लाइडिन्नैम्सटर्डम्पुर्यौ ।।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



फ्रांसराजधानी दृष्टा
गन्तास्मि मारबुर्गम्
किमिदं.... ....

यत्र यत्र यातः प्रयामि वा
तत्र तत्र दृष्टम् ।
योरोपे पाश्चात्यसंस्कृते-
र्नवं चाकचिक्यम् ।।

तीव्र - चमत्कृति - चकित - चेतसा
भवतीह भ्रमणम्
किमिदं.... ....

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# पेरिसनगरीयम्

बहुविधचाकचिक्यपरिपूर्णा
पेरिसनगरीयम् !
पेरिसनगरीयम् !!

फ्रांसदेशवासिनां सुभव्या ।
प्रिया राजधानी चिरनव्या ।।

दिव्योत्तुङ्गभवनमालानां
शीर्षं याति हि खम्
पेरिस.... ....

सैनसरित् प्रवहति पुरमध्ये ।
नौका नैकजनैर्भरिता रे ।।

सेतुषु चित्रकलाप्रदर्शनं
जनविहरणसौख्यम्
पेरिस.... ....

प्रासादेषु चारुतासारः ।
कला-शिल्प - संस्कृति - विस्तारः ।।

रम्यं गिरजागृहं काचबहु-
वर्णं नोत्रेदम्
पेरिस.... ....

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



चलति चतुर्दिक् मैत्रोयानम् ।
जनवृन्दं विदधाति प्रयाणम् ॥

भ्रामं भ्रामं यानस्थाने
जनो याति सततम्
पेरिस.... ....

सङ्ग्रहालयैर्भरितं नगरम् ।
लून' बहुखण्डं पररुचिरम् ॥

मूर्ति-चित्र- बहुकलासङ्ग्रहो
दरीदृश्यते हम्
पेरिस... ....

ऐफिलकृतेः शृङ्गमुत्तुङ्गम् ।
विश्वप्रथितं लौहमयाङ्गम् ॥

सा दृश्यते दूरत एव
चुम्बन्ती गगनम्
पेरिस... ...

नैकविश्वविद्यालयवृन्दम् ।
विविधं ज्ञानं ददात्यमन्दम् ॥

मानविकीविद्यानां विलस-
त्येकं संस्थानम्
पेरिस... ....

विविधरङ्गनृत्यादिविलासाः ।
भवन्त्योपरादिषु बहुहासाः ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



बहुतलमापणजालं प्रसृतं
विविधवस्तुजातम्
पेरिस.... ....

शाउँजे - शाँमिशेल-लेहालम् ।
मोपर्नासेस्थलं विशालम् ।।

सिते युनिवर्सिते - यूनेस्को-
कोङ्कोर्ड रम्यम्
पेरिस.... ....

गुइमे -जार्जपाम्पिदू-भवनम् ।
शेयो-बासिलिका-सत्सदनम् ।।

वेर्साई - फोण्टेन्ब्लू - शोभा
दृश्या बहिःपुरम्
पेरिस.... ....

वीथी रुइ मार्गो बुलवारम् ।
मैर्सी - सिल्वूप्ले बहुवारम् ।।

भाषा सर्वत्र हि फ्रांसीया
जनतामुखेष्विवयम्
पेरिस.... ....

विपणिषु विक्रीयते सुगन्धः ।
क्रियते ललनाजनैः प्रबन्धः ।।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



बहुसज्जाभृङ्गारवस्तुभि-
भंरितमत्र सर्वम्
पेरिस.... ....

निशि विलसत्युज्ज्वलैः प्रकाशैः ।
इन्द्रधनुर्वर्णैर्बहुभासैः ॥

सायं स्वप्नलोक इव भाति हि
विद्युद्दीप्तपुरम्
पेरिस.... ....

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# होलिका*

होली रे रसिकाः !
अयि होली रे रसिकाः !!
व्रजमध्येऽद्य तु
होली रे रसिकाः !!!

कस्य करे नु कनकजलयन्त्रम्
कस्य करे नु कनकजलयन्त्रम् ।
कस्य करे च कमोली रे रसिकाः
व्रज.......

कृष्णकरे तु कनकजलयन्त्रम्
कृष्णकरे तु कनकजलयन्त्रम् ।
राधाकरे च कमोली रे रसिकाः
व्रज.... ....

स्वस्वगृहान्निर्याता रामाः
स्वस्वगृहान्निर्याता रामाः ।
श्यामा कापि च गौरी रे रसिकाः
व्रज.... ....

उत्पटवासरञ्जिता मेघाः
उत्पटवासरञ्जिता मेघाः ।
कुङ्कुमभृता प्रतोली रे रसिकाः
व्रज.... ....

* 'होरी रे रसिया' इत्याख्यस्य व्रजलोकगीतस्यानुवादः ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# एका काङ्क्षा*

भवचक्र-चाकचिक्याद्‌द्वेजितोऽस्मि बन्धो !
किं मेलने सुखं स्याद् यदि हृदयमेव खिन्नम् ॥

कोलाहलाद् भवस्य भीतः पलायितोऽहम् ।
वचनैरवर्ण्यशान्तिं मार्गयति मानसं मे ॥

प्रशमप्रियोऽधिकोऽस्मि तीव्रो ममाभिलाषः ।
एकं महीध्रभागे लघु भवतु मे कुटीरम् ॥

चिन्ताविमोचितः स्यां विजने दिनं नयानि ।
भवदुःखकण्टकं मे मनसश्च निःसृतं स्यात् ॥

खगकलरवेषु भाव्यं रसनेन गीतिकानाम् ।
ध्वननेषु निर्झराणां भवतीव वाद्यनादः ॥

उद्‌भिद्य पुष्पकलिका सन्देशमिव ददाति ।
मधुचषकमल्पकं मे सकलं जगत्समं स्यात् ॥

हस्तौ ममोपधानं प्रच्छादनं तृणानि ।
अधरीभवेत् सभैषा शून्येऽपि तद्रसः स्यात् ॥

सञ्जातपरिचयः स्याद् वदनेन कोकिलो मे ।
मृदुमानसे न तस्य भयमस्तु लेशमात्रम् ॥

तटयोः सुपंक्तिबद्धा हरिता सुपर्णमाला ।
विमले जले तटिन्याः प्रतिबिम्बिता विभाति ॥

---

* इकबालकवेः 'एक आरज़ू' इत्यभिधाया उर्दूरचनाया अनुवादः ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



शैलावलीषु दृश्यमीदृङ्मनोरमं स्यात् ।
सलिलं तरङ्गदृग्भिरुत्थाय पश्यतीव ॥

क्रोडे यथा धरित्र्याः शयनं वनं विधत्ते ।
तृणकण्टकालिमध्ये सलिलं चमत्कृतं स्यात् ॥

नत्वा तु गुल्मशाखा सलिलञ्च चुम्बतीह ।
मुकुरे तु कापि रामा पश्यति यथाननं स्वम् ॥

रञ्जयति मेघिकाभिः सन्ध्यावधूं विवस्वान् ।
प्रत्येकपुष्पकलिका धत्तेऽरुणां सुकान्तिम् ॥

पान्था निशि भ्रमन्तः श्रान्ता यदा भवेयुः ।
शीर्णो मम प्रदीपश्चाशा भवेत्तदीया ॥

आडम्बरैर्घनानां गगनान्धकारकाले ।
चपला च दीप्यमाना दर्शयतु मे कुटीरम् ॥

सायं पिकस्य रागः प्रातश्च कुक्कुटानाम् ।
सहभाषिणो भवेम आलापने मिथस्तु ॥

कर्णे न मेऽभिगच्छेद् देवालयोत्थनादः ।
उटजस्य मे गवाक्षं सूचयतु यत्प्रभातम् ॥

मुखकरक्षालनाय चायान्ति हिमकणा यत् ।
रोदनं क्षालनं स्यादभ्यर्थनार्तनादः ॥

प्रसरन्तु नीरवेऽस्मिन्नुच्चैर्ममार्तनादाः ।
तारागणोऽपि यात्री ह्याकर्णयतु तवैनम् ॥

समवेदनालुहृदयं रोदयतु मद्विलापः ।
जागरयतु सुप्तलोकान् सर्वानचेतनांश्च ॥

❁

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# शयनं तव बाहुपाशे*

शयनं तव बाहुपाशे
वर्तते ह्यधिकं
तथैवाद्भुतं रुचिरम्
यथाप्सरोलोके नाम
राजसभ्याधरूपे वर्तनम्,
यत्र प्रत्येकं पदार्थो
वर्तते खलु पक्ष्मलः
उड्डीय सर्वे संविशन्ति परस्परं
यतः संलक्ष्यते तैः
सुखमहो ! तूड्डयन एव ।

किञ्च तेभ्यो रोचते ग्रहणं स्वकीयम्
पुनर्मुक्तिमवाप्य स्वच्छन्दं प्रयाणम्
यतस्ते सुखमाप्नुवन्तु
च्छदचयानां
नीललोहित - राजतानां
आरक्त - हरितद्युतीनां
स्वर्णिमानां सुन्दराणां
स्निग्धनीलायां प्रदोषव्याप्तकूहायाम् ।

---

* हेनरिक-नॉर्डब्राण्टनाम्नः जर्मनकवेः 'टू स्लीप इन योर आर्म्स' इति कविताया अनुवादः ।

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



ततो
यत्र त्वमसि पार्श्वे मदीये
यथा चित्रपतङ्गपक्षी
समापतितो भूतले स्यात्
परक्लिन्नो विश्लथश्च
यस्य पक्षाः पक्ष्ममाला
निद्रिता इव
शुभ्रवर्णश्लेष्मणा
श्लिष्टा मुकुलिताः ॥

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# जाता सोत्कलिका

प्रथमं या बीजमिवाङ्कुरिता
कविशैशवकाले च स्फुरिता
कविता - कन्दलिका !
कन्दल - दलवर्धनसमकालं
जाता सोत्कलिका !!

यथा यथा विगता ममायुषः
प्राथमिकी वेला ।
तथा तथोत्कलिकाया मनसो
भवति नवा खेला ।।

विश्वं बृहद् ज्ञेयताऽगम्या
याति न पञ्झटिका
जाता............

रसभावेषु निमज्जितेऽपि मयि
तृष्णा नो क्षीणा ।
कर्णौ न तु तृप्तौ हि वादिता
साङ्गीतिकवीणा ।।

गीतिरागसन्ततिस्त्वनन्ता
लय - ताल - मालिका
जाता............

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



अनुदिनमेव तर्क्यते मत्या
जीवितगणितकथा ।
प्रश्नसमूहो नावसीयते
तूत्तरमत्र वृथा ।।

अहो दुर्गमा दुःसाध्येयं
जीवन-प्रहेलिका
जाता..........

चित्र-विचित्रसंसृतेश्चित्रं
कथमिह रचयेयम् ।
रञ्जनोपकरणञ्च कल्पनं
कीदृक् कलयेयम् ।।

रञ्जनकर्मणि कृतेऽवरुध्यति
नो मे नु तूलिका
जाता..........

शनैर्लघुकरैर्हरिरारोहति
कविसर्जन-गगनम् ।
शुभ्रांशुर्वर्धते स्वकलया
ह्येकैकं नु दिनम् ।।

जीवनमधुमासे मधु लाति हि
कविता - मधूलिका
जाता..........

कवयति कविः कमपि शब्दार्थं
सुरवाणीभवने ।
पुंस्कोकिलेन वाणीकृपया
रुतं किमपि विपिने ।।

कन्दलिकोत्कलिकीभूताऽद्य
स्याद् विकसल्लतिका
जाता..........

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

# रचयिता

**डॉ० हरिदत्त शर्मा**

एम० ए०, आचार्य, डी० फिल्०

आत्मज—स्व० पं० लहरी शङ्कर शर्मा

जन्म—हाथरस, उत्तर प्रदेश; आश्विन कृष्ण नवमी वि० सं० २००५, २७ सितम्बर १९४८ ई०।

अनुसन्धान, अध्यापन, शोध-निर्देशन—इलाहाबाद विश्वविद्यालय

प्रणयन—

- संस्कृत-काव्यशास्त्रीय भावों का मनोवैज्ञानिक अध्ययन —समीक्षा-ग्रन्थ
- निबन्ध-निकुञ्जम् —संस्कृत-निबन्ध
- गीतकन्दलिका —गीतिकाव्य
  (उ० प्र० संस्कृत अकादमी द्वारा पुरस्कृत)
- त्रिपथगा —नाट्य-सङ्कलन
  (उ० प्र० संस्कृत अकादमी द्वारा विशेष पुरस्कार से पुरस्कृत)
- उत्कलिका —गीतिकाव्य
- बालगीताली —प्रकाशनाधीन

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Devavani Parishad New Delhi